# ३१. पादुका सहस्रम् - निर्वेद पद्धतिः (२०)

प्रपद्ये पादुकां देवी परविद्यामिव स्वयम् ।
यामर्पयति दीनानां दयमानो जगद्गुरुः ॥ ३१.१॥ ९५१॥

अपि जन्मनि पादुके परस्मिन्
अनघैः कर्मभि रीदृशो भवेयम् ।
य इमे विनयेन रङ्गभर्तुः
समये त्वां पदयोः समर्पयन्ति ॥ ३१.२॥ ९५२॥

परिवर्तयिता पितामहादीन् ।
त्वमिवानन्त मसौ वहत्यनेहा ।
अधुनाऽपि न शौरि पादुके त्वां
अनघालम्बन मभ्युपैति चित्तम् ॥ ३१.३॥ ९५३॥

कमला ध्युषिते निधौ निरीहे
सुलभे तिष्ठति रङ्गकोश मध्ये ।
त्वयि तत्प्रति लम्भने स्थितायां
परमन्विच्छति पादुके मनो मे ॥ ३१.४॥ ९५४॥

यद्यप्यहं तरलधी स्तव न स्मरेयं
न स्मर्तु मर्हसि कथं भवती स्वयं मे ।

वत्से विहार कुतुकं कलय त्यवस्था
का नाम केशव पदावनि वत्सलायाः ॥ ३१.५॥ ९५५॥

मात र्मुकुन्द करुणामपि निह्नुवानात्
किं वा परं किमपि किल्बिषतो मदीयात् ।
गाढं गृहीत चरणा गमनापदेशात्
तत्प्रेरण प्रणयिनी तव चेन्न लीला ॥ ३१.६॥ ९५६॥

क्षीबाऽसि काञ्चन पदावनि कैटभारेः
पादारविन्द मकरन्द निषेवणेन ।
देवि त्वदन्तिक जुषः कथ मन्यथा मे
दीनाक्षराणि न शृणोषि दयाधिका त्वम् ॥ ३१.७॥ ९५७॥

मातस्त्व दर्पित भरस्य मुकुन्दपादे
भद्रेतराणि यदि नाम भवन्ति भूयः ।
कीर्तिः प्रपन्न परिरक्षण दीक्षितायाः
किं न त्रपेत तव काञ्चन पादरक्षे ॥ ३१.८॥ ९५८॥

दौवारिक द्विरसन प्रबलान्तरायैः
दूये पदावनि दुराढ्य बिलप्रवेशैः ।
तद्रङ्गधाम निरपाय धनोत्तरायां
त्वय्येव विश्रमय मङ्क्षु मनोरथं मे ॥ ३१.९॥ ९५९॥

व्यामुह्यतां त्रिविध तापमये निदाघे
मायाविशेष जनितासु मरीचिकासु ।
संस्पृष्ट शौरि चरणा चरणावनि त्वं
स्थेया स्वयं भवसि नश्वरमे पुमर्थे ॥ ३१.१०॥ ९६०॥

अच्छेद्यया विषय वागुरया निबद्धान्
दीनान् जनार्दन पदावनि सत्पथस्था ।
प्रायः क्रमेण भवती परिगृह्य मौलौ
कालेन मोचयति नः कृपया सनाथा ॥ ३१.११॥ ९६१॥

संवाहिका चरणयो र्मणिपादरक्षे
देवस्य रङ्गवसते र्दयिता ननु त्वम् ।
कस्त्वां निवारयितु मर्हति योजयन्तीं
मातः स्वयं गुणगणेषु ममापराधान् ॥ ३१.१२॥ ९६२॥

किं वा भविष्यति परं कलुशैकवृत्तेः
एतावताऽप्यनुपजात मनेहसा मे ।
एकं तदस्ति यदि पश्यसि पादुके ते
पद्मा सहाय पदपङ्कज भोगसाम्यम् ॥ ३१.१३॥ ९६३॥

विविध विषय चिन्ता सन्तताभि श्चिरं मां

जनित कलुष मित्थं देवि दुर्वासनाभिः ।
पद सरसिजयोस्त्वं पादुके रङ्गभर्तुः
परिमल परिवाहैः पावनै र्वासयेथाः ॥ ३१.१४॥ ९६४॥

शरण मधिगत स्त्वां शार्ङ्गिणः पादरक्षे
सकृदपि विनियुक्तं त्वत्सपर्याधिकारे ।
पुनरपि कथमेनं हस्त मुत्तानयेयं
धनमद मुदितानां मानवानां समाजे ॥ ३१.१५॥ ९६५॥

यदि किमपि समीहे कर्म कर्तुं यथावत्
प्रतिपद मुपजातैः प्रत्यवेयां निमित्तैः ।
अवधिरसि यदि त्वं तत्र नैमित्तिकानां
शरणमिह न किं मे शौरि पादावनि स्याः ॥ ३१.१६॥ ९६६॥

अन्तर्लीनै रघपरिकरै राविला चित्तवृत्तिः
शब्दादीनां परवशतया दुर्जया नीन्द्रियाणि ।
विष्णोः पाद प्रणयिनि चिरादस्य मे दुःख सिन्धोः
पारं प्रप्यं भवति परया विद्यया वा त्वया वा ॥ ३१.१७॥ ९६७॥

गोमायूनां मलय पवने तस्कराणां हिमांशौ
दुर्वृत्तानां सुचरित मये सत्पथे त्वत्सनाथे ।
तत्त्वज्ञाने तरल मनसां शार्ङ्गिणः पादरक्षे

STOTRADHWANI

नित्योद्वेगो भवति नियते रीदृशी दुर्विनीतिः ॥ ३१.१८॥ ९६८॥

काले जन्तून् कलुष करणे क्षिप्र माकारयन्त्या
घोरं नाहं यम परिषदो घोष माकर्णयेयम् ।
श्रीमद्रङ्गेश्वर चरणयो रन्तरङ्गैः प्रयुक्तं
सेवाह्वानं सपदि शृणुयां पादुका सेवकेति ॥ ३१.१९॥ ९६९॥

पाषाण कल्प मन्ते परिचित गौतम परिग्रह न्यायात् ।
पतिपद परिचरणार्हं परिणमय मुकुन्द पादरक्षिणि माम् ॥ ३१.२०॥ ९७०॥

इति श्रीकवितार्किक सिंहस्य सर्वतन्त्र स्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
श्रीमद्वेदान्ताचार्यस्य कृतिषु श्रीरङ्गनाथ पादुकासहस्रे
निर्वेद पद्धति रेकत्रिंशी ॥